# INDIAN SCHOOL AL WADI AL KABIR

| Class: IX | Department: Sanskrit | Date of submission: NA |
|---|---|---|
| पुनरावृत्ति - कार्यपत्रिका | Topic: पठितावबोधनम् - 2 | Note: Pl. file in portfolio |

**1. अधोलिखितं गद्यांशं पठित्वा प्रदत्त प्रश्नानां उत्तराणि संस्कृतेन लिखित । 5**

सामान्यजीवने अन्नं, वस्त्रम्, आवासः, शिक्षा, स्वास्थ्यसेवा चेत्यादीनां मूलभूतानाम् आवश्यकतानां पूर्तये धनम् आवश्यकम्। पर्याप्तधनस्य अभावात् स्वकर्तव्यपालनं कठिनं भवति। स्वास्थ्यं, शिक्षा, सेवा, दानं चेत्यादीनि कार्याणि बाधितानि भवन्ति, दैनन्दिनजीवनं च असन्तुलितं भवति। अतः धर्मशास्त्रे चतुर्वर्गेषु धर्मार्थकाममोक्षेषु अर्थः अन्यतमः स्तम्भः इति गण्यते। **उक्तं गरुडपुराणे- ब्राह्मे मुहूर्ते चोत्थाय धर्ममर्थं च चिन्तयेत्। अर्थात् दिनस्य आरम्भे धर्मार्थयोः चिन्तनम् आवश्यकम्। स्वस्थः आर्थिकव्यवहारः त्रिविधः भवति।**

न्यायपूर्णम् अर्थोपार्जनम् - सन्मार्गेण एव धनार्जनं करणीयम् इति। उक्तं भगवता मनुना -

सर्वेषामेव शौचानामर्थशौचं परं स्मृतम्।
योऽर्थे शुचिर्हि सः शुचिर्न मृद्वारिशुचिः शुचिः ॥

**1. एकपदेन उत्तरत। (एक पद में उत्तर दीजिए।)**

(i) वस्त्रम्, आवासः, शिक्षा इत्यादिनां कृते किम् आवश्यकम् अस्ति?

(ii) कस्य अभावे कर्त्तव्यानां पालनं कर्तुं कठिनं भवति?

(iii) धर्मस्य अर्थस्य च चिन्तनं कदा करणीयम्?

**II. पूर्णवाक्येन उत्तरत। (पूर्ण वाक्य में उत्तर दीजिए।)**

(i) धनस्य अभावे के कार्याणि बाधितानि भवन्ति? (ii) धर्मशास्त्रे चत्वारः वर्गाः के कथिताः?

(iii) गरुडपुराणे किम् उक्तम्?

**III. निर्देशानुसारम् उत्तरत। (निर्देशानुसार उत्तर दीजिए।)**

(i) अन्यतमः स्तम्भः अनयोः पदयोः विशेषणपदं किम् अस्ति?

(ii) "स्वास्थ्यं, शिक्षा, सेवा, दानं चेत्यादीनि कार्याणि बाधितानि भवन्ति।" अस्मिन् वाक्ये क्रियापदम् किमस्ति?

**अथवा**

(i) 'धनम्' पदस्य पर्यायपदं किमस्ति ? (ii) सन्तुलितम् पदस्य विलोमपदं किमस्ति ?

***उत्तराणि*** *I. (i) धनं (ii) पर्याप्तधनस्य (iii) ब्राह्ममुहूर्तेः*

*II. (i) धनस्य अभावे सेवा, स्वास्थ्यं, शिक्षा, दानम् कार्याणि बाधितानि भवन्ति।*

*(ii) धर्मशास्त्रे चत्वारः वर्गाः धर्मार्थकाममोक्षाः कथिता।*

*(iii) ब्राह्म मुहूर्ते चोत्थाय धर्ममर्थं च चिन्तयेत् इति गरुणपुराणे उक्तम्।*

*III.(i) अन्यतमः (ii) भवन्ति अथवा (i) अर्थः (ii) असन्तुलितम्*

**2. अधोलिखितं नाट्यांशं पठित्वा प्रदत्त प्रश्नानां उत्तराणि संस्कृतेन लिखित । 5**

**धर्मबुद्धिः** भोः दुरात्मन् ! मा मैवं वद। धर्मबुद्धिः खल्वहम्। नैतत् चौरकर्म करोमि ।

मातृवत्परदारेषु परद्रव्येषु लोष्ठवत्।
आत्मवत्सर्वभूतेषु वीक्षन्ते धर्मबुद्धयः ।।

*(एवं द्वावपि विवदमानौ धर्माधिकारिणं निकषा गतौ)*

**धर्माधिकारी:** ननु न कोऽपि साक्षी युवाभ्यामन्यतरस्य चौरकर्मणः। अतः यत्र मानुषप्रमाणम् अनुपलब्धं तत्र वनदेवता एव न्यायनिर्णयं करिष्यति। अतः प्रातःकाले युवामस्माभिः सह तत्र वनप्रदेशं गच्छतम्। तत्रैव निर्णयः भविष्यति।

*(अत्रान्तरेपापबुद्धिः गृहं गत्वा स्वजनकं प्रबोधितवान्)*

**पापबुद्धिः** तात ! मया धर्मबुद्धेः प्रभूतः अर्थः चोरितः। भवान् यदि मदुक्तप्रकारेण वदति तर्हि तद्धनं मयि स्थिरं तिष्ठति, अन्यथास्माकं प्राणैः सह यास्यति।

**1. एकपदेन उत्तरत। (एक पद में उत्तर दीजिए।)**

(i) चौरकर्म न करोति ? (ii) के सर्वे आत्मवत्सर्वभूतेषु वीक्षन्ते?

(iii) पापबुद्धिः गृहं गत्वा कं प्रबोधितवान्?

**II. पूर्णवाक्येन उत्तरत। (पूर्णवाक्य में उत्तर दीजिए।)**

(i) अस्माकं प्राणैः सह किं आस्यति ? (ii) कः एव न्यायस्य निर्णयं करिष्यति?

(iii) पापबुद्धिः कस्य अर्थः चोरितः?

**III. निर्देशानुसारम् उत्तरत। (निर्देशानुसार उत्तर दीजिए।)**

(i) 'सायंकाले' पदस्य कि विपर्यपदं गद्यांशे प्रयुक्तम्?

(ii) 'स्त्रीवत्' पदस्य पर्यायपदं नाट्याशात् चित्वा लिखत्।

**अथवा**

(i) "तत्र वनदेवता एव न्यायनिर्णयं करिष्यति" -अस्मिन् वाक्ये कर्तृपदं किमस्ति ?

(ii) 'प्रभुतं अर्थः' अत्र विशेषणपदं किमस्ति ?

**उत्तराणि***I. (i) धर्मबुद्धिः (ii) धर्मबुद्धयः (iii) स्वजनकम्*

*II. (i) अस्माकं प्राणैः सह धनमपि यास्यति। (ii) न्यायस्य निर्णयं 'वनदेवतया' करिष्यति ।*

*(iii) पापबुद्धिः धर्मबुद्धेः प्रभूतः*

*III (i) प्रातःकाले (ii) मातृत्व् अथवा (i) वनदवेता (ii) प्रभूतं*

*************ISWK/Dept of Sanskrit-7/09/2026/Sushil Sharma ***************